# पाणिनीयव्याकरणे कर्त्रर्थककृत्प्रत्ययाः भाषावैज्ञानिकमेकं समीक्षणम्

**डॉ. सुदीप-मण्डलः**

सहायकाध्यापकः, संस्कृतविभागे उत्तरवङ्गविश्वविद्यालयस्य पश्चिमवङ्गस्थस्य

## भूमिका

षट्सु वेदाङ्गेषु प्रधानं भवति व्याकरणम्। प्रसिद्धत्वेन गृहीतेषु अष्टसु नवसु वा व्याकरणेषु अन्यतमं भवति पाणिनीयव्याकरणम्। तत्र प्रकृतिप्रत्ययाभ्यां पदानां साधुत्वं प्रतिपाद्यते। तच्च पदं सुबन्ततिङन्तभेदेन द्विधा वर्तते। तद्विधायकं सूत्रं तावत्- "सुप्तिङन्तं पदम्"[1] इति। तयोः तिङन्तपदानां प्रकृतिः भवति धातुः। सुबन्तपदानां प्रकृतिस्तु ङ्यन्तमाबन्तं प्रातिपदिकञ्चेति। तत्र ङीति ङीप् ङीष् ङीन् इत्येतेषां सामान्यरूपम्। आप् इत्यनेनापि टाप् चाप् डाप् इत्येते गृह्यन्ते। प्रातिपदिकस्य तु कृदन्तः तद्धितान्तः समासः केवलविशेष्यश्चेति भेदैः चत्वारः भेदाः विद्यन्ते। प्रतीयते विधीयते इति प्रत्ययः। स च प्रत्ययशब्दः प्रतिपूर्वकात् इण्-धातोः अच्प्रत्यये निष्पद्यते। अतिङ् अर्थात् तिङ्भिन्नः प्रत्ययः कृत्संज्ञकः भवति। धातोः विहिताः तिङ्भिन्नाः प्रत्ययाः कृत्संज्ञकाः इत्यर्थः। तद्विधायकं पाणिनीयसूत्रं तावत्- "कृदतिङ्"[2] इति। ते कृत्प्रत्ययाः कर्तृकर्मभावादिषु अर्थेषु विद्यन्ते। तेषु केवलं कर्त्रर्थकानां कृत्प्रत्ययानामेव भाषावैज्ञानिकमध्ययनं प्रबन्धेऽस्मिन् प्रस्तूयते। भाषायाः विज्ञानमर्थात् विशिष्टरूपेण ज्ञानं भवति भाषाविज्ञानम्। तच्च व्याकरणात्मकं भवति। तस्य विज्ञानदृष्टिमूलकस्य व्याकरणात्मकस्य ज्ञानमेव भाषाविज्ञानमित्युच्यते। यथा चोक्तम्–

भाषायाः विज्ञानं सर्वाङ्गं व्याकरणात्मकम्।
विज्ञानदृष्टिमूलं तत्भाषाविज्ञानमुच्यते।। इति

## १. कर्त्रर्थककृत्प्रत्ययानां वैशिष्ट्यम्

कर्तृकर्मभावादिष्वर्थेषु विद्यमानेषु कृत्प्रत्ययेषु केवलं कर्त्रर्थे ये कृत्प्रत्ययाः विधीयन्ते तेषां वैशिष्ट्यानि अत्रालोच्यन्ते। एतेषां कर्त्रर्थकानां कृत्संज्ञकानां प्रत्ययानां प्रकृतिः, अर्थाः, प्रयोगवैचित्र्यं, कर्तृत्वाद्यर्थकत्वं चेत्यादिविषयाः ससूत्रं सोदाहरणञ्च प्रबन्धेऽस्मिन् सरलतया समासेन चालोच्यन्ते।

**१.१. क्तवतु**– प्रत्ययोऽयं "क्तक्तवतू निष्ठा"[3] इति सूत्रेण निष्ठासंज्ञां प्राप्य "निष्ठा"[4] इति सूत्रेण भूते कर्त्रर्थे च विधीयते। क्तवतुप्रत्ययस्यास्य ककारस्य "लशक्वतद्धिते"[5] इति सूत्रेण,

उकारस्य "उपदेशेऽजनुनासिक इत्"[6] इति सूत्रेण च इत्संज्ञायां "तस्य लोपः"[7] इत्यनेन तयोः ककारोकारयोः लोपे तवत् इत्येव अवशिष्यते। तत्र ककारः कित्कार्यार्थः, उकारश्च उगित्कार्यार्थः इति बोध्यम्। यथा पठ्-धातोः क्तवतु-प्रत्यये अनुबन्धलोपे इडागमे नुमागमे संयोगान्तलोपे उपधादीर्घे च पठितवान् इति रूपं सिद्ध्यति। भूतार्थवृत्तेः धातोः निष्ठाविधानात् क्तवतुप्रत्ययान्तोऽपि भूतकाले एव प्रयुज्यते। तेन रामः वनं गतवान् इत्यस्य रामाभिन्नैककर्तृकवनकर्मकोत्तरदेशसंयोगानुकूलातीतकालिकव्यापारः इत्यर्थः सम्पद्यते। अत्र क्तवतुप्रत्ययेन अतीतकालः सूच्यते। अनेन क्तवतुप्रत्ययान्तेन वाक्यसमाप्तिः अर्थात् क्रियायाः समाप्तिः अपि सूच्यते। अतः रामः वनं गतवान् इत्यत्र पृथक्तया समाप्तिसूचकस्य आसीदित्यादिक्रियापदस्यापेक्षा न भवति। क्वचित् रामः वनं गतवान् आसीदित्यादिरूपेण अस्त्यासीदित्यादीनां प्रयोगोऽपि दृश्यते। तदा तु क्रियापदोक्तकालस्य सापेक्षे क्तवतुप्रत्ययान्तस्यास्य अतीतकालत्वं बोध्यम्। अस्य क्तवतुप्रत्ययान्तस्य सर्वासु विभक्तिषु प्रयोगः सम्भवति। यथा पठितवान् रामः, पठितवन्तं रामं, पठितवता रामेण, पठितवते रामाय, पठितवतः रामात्, पठितवतः रामस्य, पठितवति रामे इत्यादिरूपेण। क्तवतुप्रत्ययान्तस्यास्य भावसप्तम्यामपि प्रयोगः दृश्यते। यथा पठितवत्सु छात्रेषु आचार्यः अगच्छत् इति। "कर्तरि कृत्"[8] इति सूत्रेण कर्त्रर्थे विधीयते कतृविशेषणरूपोऽयं कृत्संज्ञकः क्तवतुप्रत्ययः। अतः कर्तुः लिङ्गवचनानुसारेणैव क्तवतुप्रत्ययान्तस्यापि समानलिङ्गवचनत्वं प्राप्यते। यथा रामः पठितवान्, रामाः पठितवन्तः, सीता पठितवती, सीताः पठितवत्यः, मित्रं पठितवत्, मित्राणि पठितवन्तीति।

**१.२. क्त**– "क्तक्तवतू निष्ठा"[9] इति सूत्रेण निष्ठासंज्ञकत्वादयं क्तप्रत्ययोऽपि "निष्ठा" इत्यनेन सूत्रेण भूते विधीयते। यद्यपि क्तप्रत्ययः भावकर्मणोः एव भवति तथापि "आदिकर्मणि क्तः कर्तरि च"[10] "गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुह-जीर्यतिभ्यश्च"[11] इति सूत्राभ्यां कर्तरि अपि भवति। क्तप्रत्ययस्यास्य ककारस्य इत्संज्ञायां लोपे च त इत्येव अवशिष्यते। तस्य क्तप्रत्ययस्य कित्त्वात् गुणनिषेधादयः सिद्ध्यन्ति। यथा गम्-धातोः क्तप्रत्यये अनुबन्धलोपे गम् त इति जाते किति क्तप्रत्यये परे "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति"[12] इत्यनेन अनुनासिकस्य मकारस्य लोपे गत इति रूपं सिद्ध्यति। भूतार्थवृत्तेः धातोः निष्ठाविधानात् क्तप्रत्ययोऽयमपि भूतकाले भवति। तेन रामः विद्यालयं गतः इत्यस्य रामाभिन्नैककर्तृकविद्यालयैककर्मकोत्तरदेश-संयोगानुकूलातीतकालिकव्यापारः इत्यर्थः सम्पद्यते। अर्थात् क्तप्रत्ययेन अतीतकालः सूच्यते। अनेन क्तप्रत्ययान्तेन वाक्यसमाप्तिः अर्थात् क्रियायाः समाप्तिः अपि सूच्यते। अतः रामः वनं गतः इत्यत्र पृथक्तया समाप्तिसूचकस्य आसीदित्यादिक्रियापदस्यापेक्षा न भवति। कर्तृविशेषणरूपोऽयं कृत्संज्ञकः क्तप्रत्ययः कर्त्रर्थे विधीयते। अतः "यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेषस्य, तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्यापि" इति नियमात् कर्त्रानुगुण्येन लिङ्गवचनपरिवर्तनं क्तप्रत्ययान्तस्यापि

दृश्यते। यथा रामः गतः, रामाः गताः, सीता गता, सीताः गताः, मित्रं गतम्, मित्राणि गतानि इति। भावसप्तम्यामप्यस्य क्तप्रत्ययान्तस्य प्रयोगः दृश्यते। यथा रामे गते वयं पठामः इति।

**१.३. शतृ**- "लटः शतृशानचावप्रथमासमानाधिकरणे"[13] इत्यनेन परस्मैपदिनः धातोः वर्तमानकाले कर्त्रर्थकः शतृप्रत्ययोऽयं विधीयते। अस्य शतुः शकारस्य ऋकारस्य च इत्संज्ञायां तयोः लोपे अत् इत्येव अवशिष्यते। तत्र शकारः सार्वधातुकार्थम्, ऋकारश्च उगित्कार्यार्थं प्रयुज्यते। यथा पच्-धातोः शतृप्रत्यये शपि अनुबन्धलोपे पच् अ अत् इति जाते नुमागमे संयोगान्तलोपे प्रक्रियाक्रमे पचन् इति रूपं सिद्ध्यति। यद्यपि शतृप्रत्ययोऽयम् अप्रथमासमानाधिकरणे भवतीति उच्यते। यथा पचन्तं रामं पश्य, पचता रामेण कृतम्, पचते रामाय देहि, पचतः रामात् स्वीकुर्वन्तु, पचतः बालकस्य नाम किम्, पचति रामे सामर्थ्यमस्ति इत्यादिः। तथापि लडिति वर्तमाने लब्धे पुनर्लड्ग्रहणसामर्थ्यात् प्रथमासमानाधिकरणे अपि शतृप्रत्ययः भवति। यथा रामः गच्छन् अस्ति इति। अर्थात् सर्वासु विभक्तिषु अस्य शतृप्रत्ययस्य प्रयोगः सम्भवति। शतृप्रत्ययान्तेनानेन क्रियायाः समाप्तिः न सूच्यते। अतः शतृप्रत्ययान्तघटके वाक्ये "रामः पचन् अस्ति" इत्यादौ क्रियायाः समाप्तिसूचकानाम् अस्त्यासीदित्यादिपदानामपेक्षा भवति। पुनश्च यद्यपि वर्तमानकाले शतृप्रत्ययः विधीयते तथापि क्रियासमाप्तिसूचकैः अस्त्यासीदित्यादिक्रियापदैः यः कालः निर्दिश्यते, शतृप्रत्ययान्तेन स एव कालः बोध्यते। अर्थात् वाक्यसमाप्तिसूचकैः क्रियापदैः ज्ञापितः कालः एव शत्रन्तस्य वर्तमानः कालः इति वर्तमानशब्देनात्र सूच्यते। तेन रामः गच्छन् हसति इत्यत्र हसति इति क्रियापदेन यथा वर्तमानकालिकी हसनक्रिया ज्ञायते तथैव तत्र विद्यमानेन गच्छन् इति शतृप्रत्ययान्तेन वर्तमानकालिकी गमनक्रिया ज्ञायते। ततः रामः गच्छन् हसति इत्यस्य समानकालिकोत्तरदेशसंयोगानुकूलव्यापाराश्रयाभिन्न-रामाभिन्नैककर्तृक-हसनानुकूलवर्तमानकालिकव्यापारः इत्यर्थः सम्पद्यते। पुनश्च रामः गच्छन् अखादीत् इत्यत्र अखादीत् इति क्रियापदेन यथा अतीतकालिकी क्रिया ज्ञायते तथैव तत्र विद्यमानेन गच्छन् इति शत्रन्तेन अतीतकालिकी गमनक्रिया ज्ञायते। तेन रामः गच्छन् अखादत् इत्यस्य समानकालिकोत्तरदेशसंयोगानुकूलव्यापाराश्रयाभिन्न-रामाभिन्नैककर्तृकखादनानुकूलभूतकालिकव्यापारः इत्यर्थः सम्पद्यते। अयमपि "कर्तरि कृत्"[14] इति सूत्रेण कर्त्रर्थे विधीयते। अतः कर्तृविशेषणस्यास्य शतृप्रत्ययान्तस्य कर्त्रानुगुण्येन समानलिङ्गवचनत्वं प्राप्नोति। तेन रामः गच्छन् अस्ति, सीता गच्छन्ती अस्ति, मित्रं गच्छत् अस्ति इत्यादिरूपेण प्रयोगः भवति।

**१.४. शानच्**- "लटः शतृशानचावप्रथमासमानाधिकरणे"[15] इत्यनेन आत्मनेपदिनः धातोः वर्तमानकाले शानच्प्रत्ययोऽयं विधीयते। अस्य शानचः शकारस्य चकारस्य च इत्संज्ञायां तयोः लोपे आन इत्येव अवशिष्यते। तत्र शकारः सार्वधातुकार्थम्, चकारश्च स्वरार्थं प्रयुज्यते। यथा पच्-धातोः शानचि शपि अनुबन्धलोपे पच् अ आन इति जाते मुगागमे पचमान इति रूपं सिद्ध्यति। अयं शानच्प्रत्ययोऽपि अप्रथमासमानाधिकरणे भवतीति उच्यते। यथा वन्दमानं रामं पश्य,

वन्दमानेन रामेण उक्तम्, वन्दमानाय रामाय देहि, वन्दमानात् रामात् स्वीकुर्वन्तु, वन्दमानस्य बालकस्य नाम किम्, वन्दमाने रामे सामर्थ्यमस्ति इत्यादिः। परन्तु लडिति वर्तमाने लब्धे पुनर्लड्ग्रहणसामर्थ्यात् प्रथमासमानाधिकरणे अपि शानच्प्रत्ययः भवति। यथा कम्पमानः पुरुषः गच्छति इति। अर्थादस्य शानचोऽपि सर्वासु विभक्तिषु प्रयोगः सम्भवति। शानच्प्रत्ययान्तेनानेनापि क्रियायाः समाप्तिः न सूच्यते। अतः शानच्प्रत्ययान्तघटके वाक्ये "रामः वन्दमानः अस्ति" इत्यादौ क्रियायाः समाप्तिसूचकानाम् अस्त्यासीदित्यादिपदानामपेक्षा भवति। यद्यपि वर्तमानकाले शानच्प्रत्ययः विधीयते तथापि क्रियासमाप्तिसूचकैः अस्त्यासीदित्यादिपदैः यः कालः निर्दिश्यते, शानच्प्रत्ययान्तेनापि स एव कालः बोध्यते। अर्थात् अत्रापि वाक्यसमाप्तिसूचकैः क्रियापदैः ज्ञापितः कालः एव शानजान्तस्य वर्तमानः कालः इति वर्तमानशब्देन सूच्यते। तेन रामः वन्दमानः अस्ति इत्यादौ अस्तिक्रियासापेक्षे वन्दमानः इति शानच्प्रत्ययान्तस्य स्तुत्यनुकूलक्रिया वर्तमानकालिकी इति सिद्ध्यति। ततः रामः वन्दमानः अस्ति इत्यस्य स्तुत्यनुकूलव्यापाराश्रयरामाभिन्नैककर्तृकसत्तानुकूल-वर्तमानकालिकव्यापारः इत्यर्थः सम्पद्यते। पुनश्च रामः वन्दमानः आसीदित्यत्र आसीदिति अतीतकालिकक्रियापदसापेक्षे वन्दमानः इति शानजान्तस्य स्तुत्यनुकूलक्रिया अतीतकालिकी इत्येव ज्ञायते। तेन रामः वन्दमानः आसीदित्यस्य स्तुत्यनुकूलव्यापाराश्रयरामाभिन्नैककर्तृक-सत्तानुकूलातीतकालिकव्यापारः इत्यर्थः सम्पद्यते। अयमपि "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे विधीयते। अतः कर्तृविशेषणस्यास्य शानच्प्रत्ययान्तस्य कर्त्रानुगुण्येन समानलिङ्गवचनत्वं प्राप्नोति। तेन रामः कम्पमानः अस्ति, सीता कम्पमाना अस्ति, मित्रं कम्पमानम् अस्ति इत्यादिरूपेण प्रयोगः भवति। कर्मणि शानच् तु सर्वेभ्यः धातुभ्य अर्थात् आत्मनेपदिभ्यः परस्मैपदिभ्यः च धातुभ्यः भवति। स च कर्मणः एव विशेषणमिति ज्ञेयम्।

**१.५. कानच्**- "लिटः कानज्वा"[16] इत्यनेन छन्दसि परोक्षभूतकाले लिटः स्थाने कर्त्रर्थकः कानच्प्रत्ययोऽयं विधीयते। छन्दसि अनद्यतनपरोक्षत्वं न विवक्षितम्। अतः छन्दसि भूतसामान्ये लिटः कानच् भवतीत्यर्थः सम्पद्यते। प्रत्ययान्तेनानेन भूतकालः एव सूच्यते। तत्र कानजान्तस्यातीतकालत्वं वाक्ये प्रयुज्यमानायाः मूलक्रियायाः सापेक्षे इति बोध्यम्। अस्य कानचः ककारचकारयोः इत्संज्ञायां तयोः लोपे आन इत्येव अवशिष्यते। तत्र कित्करणं गुणनिषेधादिकार्यार्थम्, चित्करणं तु अन्तोदात्तस्वरार्थमिति बोध्यम्। यथा चिधातोः लिटि धातोः द्वित्वे अभ्यासादुत्तरस्य चकारस्य कुत्वे यणादेशे चिक्यान इति रूपं सिद्ध्यति। ततः ब्राह्मणः अग्निं चिक्यानः इत्यस्य ब्राह्मणाभिन्नैककर्तृकाग्निकर्मकचयनानुकूलातीतकालिकव्यापारः इत्यर्थः सम्पद्यते। अनेन कानच्प्रत्ययेन असमापिका क्रिया उच्यते। अतः क्रियासमाप्त्यर्थं पृथक्तया अस्त्यासीदित्यादिपदानि वाक्ये उपयुज्यन्ते। अस्य कानचः सर्वासु विभक्तिषु प्रयोगः सम्भवति। यथा अग्निं चिक्यानं ब्राह्मणं पश्य, अग्निं चिक्यानेन ब्राह्मणेन मन्त्रः पठ्यते, चिक्यानाय ब्राह्मणाय देहि, चिक्यानात् ब्राह्मणात्, चिक्यानस्य ब्राह्मणस्य, चिक्याने ब्राह्मणे इत्यादयः। ब्राह्मणे अग्निं चिक्याने सति यज्ञारम्भः भवेदित्यादिरूपेण भावसप्तम्यामपि अप्यस्य कानचः प्रयोगः सम्भवति।

पुनश्च "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे अयं कानच् भवति। अतः कर्तृविशेषणत्वात् कृत्संज्ञकस्यास्य कानच्प्रत्ययान्तस्य कर्त्रानुगुण्येन समानलिङ्गवचनत्वं प्राप्नोति। यथा अग्निं चिक्यानः ब्राह्मणः, चिक्यानाः ब्राह्मणाः, चिक्याना माता, चिक्यानाः मातरः, चिक्यानं मित्रम्, चिक्यानानि मित्राणि इति।

**१.६. क्वसु**– "क्वसुश्च"[17] इत्यनेन सूत्रेण छन्दसि भूतकाले कर्त्रर्थकः क्वसुः भवति। छन्दसि अनद्यतनपरोक्षत्वाभावात् भूतसामान्ये लिटः क्वसुः भवतीत्यर्थः सम्पद्यते। अयं यथा छन्दसि भवति तथा भाषायामपि "भाषायां सदवसश्रुवः"[18] इति सूत्रेण सदादिभ्यः विकल्पेन भवति। तत्र क्वसोः ककारस्य उकारस्य च इत्संज्ञायाम्, तयोः लोपे वस् इत्येव अवशिष्यते। कित्करणं गुणनिषेधादिकार्यार्थम्, उगित्करणं नुमर्थमिति बोध्यम्। यथा पाधातोः लिटि, लिटः क्वस्वादेशे इटि आकारलोपे द्वित्वे अभ्यासकार्ये नुमागमे संयोगान्तलोपे उपधादीर्घे पपिवान् इति रूपं सिद्ध्यति। भूतसामान्ये विधानात् अनेन क्वस्वन्तेन भूतकालः एव सूच्यते। तेन रामः पपिवान् इत्यस्यार्थः रामाभिन्नैककर्तृकपानानुकूलातीतकालिकव्यापारः इत्यर्थः सम्पद्यते। अनेन क्वसुप्रत्ययान्तेन क्रियायाः समाप्तिः अपि सूच्यते। अतः रामः पपिवान् इत्यत्र पृथक्तया समाप्तिसूचकस्य आसीदित्यादिक्रियापदस्यापेक्षा न भवति। क्वचित् रामः पपिवान् आसीदित्यादिरूपेण अस्त्यासीदित्यादीनां प्रयोगोऽपि दृश्यते। तदा तु क्रियापदोक्तकालसापेक्षे अस्य क्वसुप्रत्ययान्तस्यातीतकालत्वमिति बोध्यम्। अस्य क्वसुप्रत्ययान्तस्य सर्वासु विभक्तिष्वपि प्रयोगः सम्भवति। भावसप्तम्यामपि अस्य प्रयोगः सम्भवति। कतृविशेषणरूपोऽयं कृत्संज्ञकः क्वसुप्रत्ययः "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे विधीयते। अतः विशेषणरूपस्य क्वसुप्रत्ययान्तस्य विशेष्यानुसारेण समानलिङ्गवचनत्वं प्राप्नोति। यथा रामः पपिवान्, रामाः पपिवांसः, सीता पप्युषी, मित्रं पपिवः इति।

**१.७. शानन्**– "पूङ्यजोः शानन्"[19] इत्यनेन कृत्संज्ञकोऽयं शानन्प्रत्ययः पूङ्यज्धातुभ्यां कर्त्रर्थे विधीयते। "वर्तमाने लट्"[20] इत्यतः वर्तमाने इत्यस्यानुवृत्त्या लाभात् प्रत्ययोऽयं वर्तमानकाले भवति। अत्रापि वर्तमानशब्देन वाक्यसमाप्तिसूचकैः क्रियापदैः ज्ञापितः कालः एव शानन्प्रत्ययान्तस्य वर्तमानः कालः इति सूच्यते। पुनश्च सूत्रेऽस्मिन् लटः निवृत्त्या लादेशत्वाभावात् शाननः स्वतन्त्रत्वं सिद्ध्यति। तेन पवते यजते इत्यादयोऽपि स्यात्। ततः "कर्तरि कृत्" इत्यनेन कर्तरि एवायं प्रत्ययः विधीयते, न तु भावकर्मणोः। शाननोऽस्य शकारस्य नकारस्य च इत्संज्ञायां तयोः लोपे आन इत्येव तिष्ठति। अत्र शकारः सार्वधातुकसंज्ञार्थं, नकारः आद्युदात्तस्वरार्थं प्रयुज्यते। यथा पूङ् पवने इति धातोः शाननि शपि अनुबन्धलोपे पू अ आन इति जाते गुणे अवादेशे मुगागमे पवमान इति रूपं सिद्ध्यति। ततः ब्राह्मणः सोमं पवमानः अस्ति इत्यस्यार्थः भवति सोमकर्मकपवनानुकूलवर्तमानकालिक-
व्यापाराश्रयब्राह्मणाभिन्नैककर्तृकसत्तानुकूलवर्तमानकालिकव्यापारः इति। अनेन शानन्प्रत्ययेन क्रियायाः समाप्तिः न भवति। अतः समाप्तिसूचकानामस्त्यादीनां प्रयोगः दृश्यते। तैः समाप्तिसूचकैः

पदैः उक्तः कालः शाननोऽपि कालः इति ज्ञेयम्। सर्वासु विभक्तिषु चास्य प्रयोगः सम्भवति। यथा सोमं पवमानं ब्राह्मणं, सोमं पवमानेन ब्राह्मणेन, सोमं पवमानाय ब्राह्मणाय, सोमं पवमानात् ब्राह्मणात्, सोमं पवमानस्य ब्राह्मणस्य, सोमं पवमाने ब्राह्मणे इत्यादयः। ब्राह्मणे सोमं पवमाने यज्ञारम्भः स्यादित्यादिरूपेण भावसप्तम्यामपि अस्य प्रयोगः भवति। कर्तृविशेषणत्वात् शाननोऽस्य कर्त्रनुसारेण समानलिङ्गवचनत्वं प्राप्नोति। यथा पवमानः ब्राह्मणः, पवमानाः ब्राह्मणाः, पवमाना व्यक्तिः, पवमानाः व्यक्तयः, पवमानं मित्रं पवमानानि मित्राणि इति। शानच्शाननोः रूपभेदाभावेऽपि पार्थक्यं तु अस्त्येव। यथा शानचा चित्स्वरः शानना च नित्स्वरः सिद्ध्यति। पुनः शानच् धातुसामान्यात् विधीयते। परन्तु शानन् पूङ्यजोः एव विधीयते न तु अन्यत्र।

**१.८. चानश्**- कृत्संज्ञकोऽयं प्रत्ययः "ताच्छील्यवयोवचनशक्तिषु चानश्"[21] इति सूत्रेण ताच्छील्यादिष्वर्थेषु वर्तमानात् धातोः कर्त्रर्थे भवति। अत्रापि वर्तमाने इत्यस्य अनुवृत्त्या लाभात् वर्तमानकाले एवायं भवति। अत्रापि वर्तमानशब्देन वाक्यसमाप्तिसूचकैः क्रियापदैः ज्ञापितः कालः एव चानशः वर्तमानः कालः इति सूच्यते। पुनः अत्र लटः निवृत्त्या लादेशत्वाभावात् अस्यापि स्वतन्त्रत्वं सिद्ध्यति। तेन परस्मैपदिभ्यः धातुभ्योऽप्ययं चानश् विधीयते। अस्य चानशः चकारस्य शकारस्य च इत्संज्ञायां लोपे आन इत्येव अवशिष्यते। अत्र चकारः चित्स्वरार्थः, शकारश्च सार्वधातुकार्थः वर्तते। यथा भुञ्जधातोः चानशि अनुबन्धलोपे भुञ्जान इति रूपं सिद्ध्यति। अनेन चानशा वाक्यं न समाप्यते। अतः वाक्यसमाप्त्यर्थमस्त्यादीनां प्रयोगः अपेक्षते। यथा भोगं भुञ्जानः अस्तीति। ततः मनुष्यः भोगं भुञ्जानः अस्तीत्यस्यार्थः भवति भोगसम्पादनानुकूलवर्तमानकालिक-व्यापाराश्रयमनुष्याभिन्नैककर्तृकसत्तानुकूलवर्तमानकालिकव्यापारः इति। अस्यापि भुञ्जानं मनुष्यं, भुञ्जानेन मनुष्येण, भुञ्जानाय मनुष्याय, भुञ्जानात् मनुष्यात्, भुञ्जानस्य मनुष्यस्य, भुञ्जाने मनुष्ये इत्यादिरूपेण सर्वासु विभक्तिषु प्रयोगः दृश्यते । भावसप्तम्यामपि अस्य प्रयोगः सम्भवति। यथा भोगं भुञ्जाने मनुष्ये कथं मोक्षः इति। अस्य लादेशत्वाभावात् "कर्तरि कृत्" इत्यनेन कर्तरि एवास्य विधानम्। तेन कर्त्रानुगुण्येन समानलिङ्गवचनत्वं सिद्ध्यति। यथा भोगं भुञ्जानः मनुष्यः, भुञ्जानाः मनुष्याः, भुञ्जाना नारी, भुञ्जानाः नार्यः, भुञ्जानं मित्रं, भुञ्जानानि मित्राणि इति। शानच्चानशोः समानरूपत्वेऽपि फलभेदस्तु अस्त्येव। यथा शानच् आत्मनेपदिभ्यः धातुभ्यः विधीयते, परन्तु चानश् ताच्छील्यादिष्वर्थेषु विद्यमानेभ्यः परस्मैपदिभ्योऽपि विधीयते।

**१.९. ण्वुल्**– कृत्संज्ञकोऽयं प्रत्ययः "ण्वुल्तृचौ"[22] इति सूत्रेण सर्वेभ्यः धातुभ्यः कर्त्रर्थे विधीयते। अस्य ण्वुलः णकारस्य लकारस्य च इत्संज्ञायां तयोः लोपे वु इत्येव अवशिष्यते। ण्वुलि णकारः वृद्ध्यर्थकः लकारश्च स्वरार्थकः वर्तते। यथा पच्-धातोः ण्वुलि अनुबन्धलोपे पच् वु इति जाते "युवोरणाकौ"[23] इति सूत्रेण वोः अक् इत्यादेशे पाचकः इति रूपं सिद्ध्यति। "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे अयं ण्वुल् भवति। तेन ण्वुलः अर्थः भवति कर्ता। ततः पाचकः इत्यस्यार्थः पाककर्ता इत्यर्थः सम्पद्यते। अनेन न कोऽपि कालः सूच्यते। अतः वाक्यसमाप्त्यर्थं पृथक्तया

अस्त्यादिक्रियापदानामपेक्षा भवति। यद्यपि कालनिरपेक्षोऽयं कृत्संज्ञकः ण्वुल् प्रत्ययः तथापि ण्वुल्तृचोः वर्तमानकालादन्यत्र न प्रयोगः इति भाष्यकारेणोक्तम्। तत्र वर्तमानशब्देन वाक्यस्थैः क्रियापदैः उक्तः कालः एव सूच्यते। अस्य ण्वुलप्रत्ययस्य सर्वासु विभक्तिषु प्रयोगः सम्भवति। यथा पाचकः गच्छति, पाचकं पश्य, पाचकेन कृतम्, पाचकाय देहि, पाचकात् स्वीकरोतु, पाचकस्य वस्तु, पाचके बुद्धिः अस्ति इत्यादयः। पाचके आगते रन्धनक्रिया आरब्धा इत्यादिरूपेण भावसप्तम्यामपि अस्य प्रयोगः सम्भवति। कर्तृविशेषणत्वात् कर्तुः लिङ्गवचनानुसारेण अस्य ण्वुलोऽपि समानलिङ्गवचनत्वं प्राप्नोति। यथा पाचकः रामः, पाचकाः रामाः, पाचिका नारी,पाचिकाः नार्यः इत्यादयः। पाचकः रामः आगच्छति इत्यादिषु ण्वुलप्रत्ययान्तस्य यथा विशेषणरूपेण प्रयोगः दृश्यते तथा क्वचित् पाचकः गच्छति इत्यादिषु विशेष्यरूपेणापि अस्य ण्वुलप्रत्ययान्तस्य प्रयोगः दृश्यते।

**१.१०. तृच्**– अयं कर्त्रर्थकः कृत्प्रत्ययोऽपि “ण्वुल्तृचौ”[24] इत्यनेन धातोः विधीयते। अस्य तृचः चकारस्य इत्संज्ञायां लोपे तृ इत्येव अवशिष्यते। स च चकारः “तुश्छन्दसि”[25] इत्यादौ सामान्यग्रहणार्थं प्रयुज्यते, न तु अन्तोदात्तस्वरार्थम्। यतो हि “आद्युदात्तश्च”[26] इत्यनेनैव स्वरः सिद्ध्यतति। यथा हृधातोः तृचि अनुबन्धलोपे गुणे रपरत्वे विभक्तिकार्ये हर्ता इति रूपम्। अत्र विद्यमानस्य तृचप्रत्ययस्यार्थः कर्ता। अतः हर्ता इत्यस्य हरणकर्ता इत्यर्थः। यद्यपि अनेन कोऽपि कालः न सूच्यते तथापि वर्तमानकाले एव ण्वुल्तृचोः प्रयोगः इति भाष्यम्। अत्रापि वर्तमानशब्देन वाक्यस्थैः क्रियापदैः उक्तः कालः एव सूच्यते। अस्य तृचः सर्वासु विभक्तिष्वपि प्रयोगः दृश्यते। यथा कर्ता कार्यं करोति, कर्तारं पश्य, कर्त्रा कार्यं कृतम्, कर्त्रे देहि, कर्तुः चाकलेहं स्वीकरोतु, कर्तुः हस्तात् पतितम्, कर्तरि ज्ञानमस्ति इत्यादयः। भावसप्तम्यामपि अस्य प्रयोगः सम्भवति। यथा कर्तरि आगते द्वारमुद्घाटयतु इति। अयं तृच् “कर्तरि कृत्” इति सूत्रेण कर्त्रर्थे विधीयते। अतः कर्तृविशेषणत्वात् कर्तुः लिङ्गवचनानुसारेण तृजन्तस्यापि समानलिङ्गवचनत्वं प्राप्नोति। यथा कर्ता आगच्छति, कर्तारः आगच्छन्ति, कर्त्री आगच्छति, कर्त्र्यः आगच्छन्ति इत्यादयः। तृजन्तस्य क्वचित् विशेष्यरूपेण क्वचित् विशेषणरूपेण प्रयोगः सम्भवति। यथा कर्ता रामः आगच्छति इत्यादिषु तृजन्तस्य रामविशेषणरूपेण प्रयोगः। परन्तु कर्ता आगच्छति इत्यादिषु तु तृजन्तस्य विशेष्यरूपेण प्रयोगः दृश्यते।

**१.११. ल्यु**– “नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः”[27] इति सूत्रेणायं कृत्संज्ञकः ल्युः प्रत्ययः भवति। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकं सम्बध्यते इति नियमात् नन्द्यादिभ्यः ल्युः इति सिद्ध्यति। धातुपाठे सन्निविष्टानां नन्द्यादीनां नात्र ग्रहणम्। परन्तु वृत्तौ पठितेषु नन्दन रमण इत्येवमादिषु प्रातिपदिकेषु अपोद्धृत्य ये प्रकृतयः दृश्यन्ते, तेषां नन्द्यादीनामेवात्र ग्रहणम्। तत्प्रयोजनं तु संज्ञाविशिष्टे साधुत्वम्। तेभ्यः नन्द्यादिगणे विद्यमानेभ्यः ण्यन्तेभ्यः अण्यन्तेभ्यः वा धातुभ्यः ल्युप्रत्ययः भवति। तस्य ल्युप्रत्ययस्य लकारस्य इत्संज्ञायां लोपे यु इत्येव अवशिष्यते। तत्र लित्करणं स्वरार्थमेव। यथा ण्यन्तात् टुनदि इति धातोः प्रकृतसूत्रेण ल्युप्रत्यये अनुबन्धलोपे णिचः

लोपे नन्द् यु इति जाते योः अनादेशे नन्दन इति रूपं सिद्ध्यति। प्रत्ययोऽयं "कर्तरि कृत्" इत्यनेन कर्त्रर्थे विधीयते। तेन नन्दन इत्यस्य समृद्धकर्ता इत्यर्थः। अत एव वृत्तौ नन्दयतीति नन्दनः इत्युक्तम्। ल्युप्रत्ययेनानेन क्रियासमाप्तिः न दृश्यते। अतः क्रियायाः समाप्त्यर्थं ल्युप्रत्ययघटके वाक्ये अस्त्यादीनां क्रियापदानामपेक्षा भवति। सर्वासु प्रथमादिषु विभक्तिषु नन्दनः पश्यति, नन्दनं पश्य, नन्देनेन पृष्ठम्, नन्दनाय देहि, नन्दनात् प्राप्तम्, नन्दनस्य लावण्यं, नन्दने कला इत्यादिरूपेण ल्युप्रत्ययान्तस्यास्य प्रयोगः सम्भवति। नन्दने आगते अस्माकं समृद्धिः इत्यादिरूपेण भावसप्तम्यामपि अस्य प्रयोगः सम्भवति। कर्तृविशेषणत्वात् कर्तुः लिङ्गवचनानुसारेण अस्य ल्युप्रत्ययान्तस्यापि समानलिङ्गवचनत्वं प्राप्नोति। यथा लवणः सूपः, लवणा मृत्तिका, लवणं जलमित्यादयः।

**१.१२. णिनि**– "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः"[28] इत्यनेन कृत्संज्ञकः णिनिप्रत्ययोऽयं विधीयते। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकं सम्बध्यते इति नियमात् ग्रह्यादिभ्यः णिनिः सिद्ध्यति। अत्रापि संज्ञाविशिष्टे साधुत्वलाभाय वृत्तौ पठितानां ग्रह्यादीनामेव ग्रहणम्, न तु धातुपाठे सन्निविष्टानां ग्रह्यादीनां ग्रहणम्। अतः तेभ्यः ग्रह्यादिगणे विद्यमानेभ्यः धातुभ्यः णिनिप्रत्ययः भवति। तस्य णिनेः णकारस्य इकारस्य च इत्संज्ञायां तयोः लोपे इन् इत्येव अवशिष्यते। तत्र णित्करणं वृद्ध्यादिणित्कार्यार्थम्। यथा मन्त्रयति इत्यर्थे मन्त्र् इति धातोः प्रकृतसूत्रेण णिनिप्रत्यये अनुबन्धलोपे णिचः लोपे च मन्त्रिन् इति जाते प्रक्रियाक्रमे मन्त्री इति रूपं सिद्ध्यति। अयं णिनिः अपि "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे विधीयते। ततः मन्त्री इत्यस्य मन्त्रणकर्ता इत्यर्थः सम्पद्यते। अनेन णिनिप्रत्ययेन क्रिया नोच्यते। अतः क्रियायाः समाप्त्यर्थं णिनिप्रत्ययघटके वाक्ये अस्त्यादीनां क्रियापदानामपेक्षा भवति। सर्वासु प्रथमादिषु विभक्तिषु मन्त्री गच्छति, मन्त्रिणं पश्य, मन्त्रिणा कृतम्, मन्त्रिणे ददातु, मन्त्रिणः ज्ञानं लब्धम्, मन्त्रिणः चातुर्यम्, मन्त्रिणि विचक्षणता इत्यादिरूपेण णिनिप्रत्ययान्तस्यास्य प्रयोगः सम्भवति। मन्त्रिणि विचिन्त्यमाने अस्माकं सौविध्यम् इत्यादिरूपेण भावसप्तम्यामपि अस्य प्रयोगः सम्भवति। कर्तृविशेषणत्वात् कर्तुः लिङ्गवचनानुसारेण अस्य णिनिप्रत्ययान्तस्यापि समानलिङ्गवचनत्वं प्राप्नोति। यथा मन्त्री महोदयः, मन्त्रिनः महोदयाः, मन्त्रिणी महोदया, मन्त्रिण्यः महोदयाः, मन्त्रिन् मित्रम् इत्यादयः।

**१.१३.अच्**- "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः"[29] इत्यनेनायं कर्त्रर्थकः कृत्संज्ञकः अच्प्रत्ययः विधीयते। प्रत्ययोऽयं पचाद्याकृतिगणे विद्यमानेभ्यः धातुभ्यः विधीयते। अचोऽस्य चकारस्य इत्संज्ञायां लोपे अ इत्येवावशिष्यते। तत्र चित्स्वरार्थं चकारः प्रत्यये उपयुज्यते। यथा पचतीति विग्रहे पच्-धातोः प्रकृतसूत्रेण अचि अनुबन्धलोपे पच् अ इति जाते प्रक्रियाक्रमे पचः इति रूपं सिद्ध्यति। "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे कृत्संज्ञक अच्प्रत्ययोऽयं विधीयते। ततः पचः इत्यस्य पाककर्ता इत्यर्थः सम्पद्यते। अनेनापि अच्प्रत्ययेन क्रिया नोच्यते। अतः क्रियायाः समाप्त्यर्थम् अच्प्रत्ययघटके वाक्ये अस्त्यादीनां क्रियापदानामपेक्षा भवति। पचः आगच्छति, पचं पश्य, पचेन सम्पादितम्, पचाय देहि, पचात् स्वीकरोतु, पचस्य वस्तु, पचे रन्धनकला वर्तते

इत्यादिरूपेण सर्वासु प्रथमादिषु विभक्तिषु अच्प्रत्ययान्तस्यास्य प्रयोगः सम्भवति। पचे उक्ते रन्धनप्रक्रिया आरभ्यते इत्यादिरूपेण भावसप्तम्यामपि अस्य प्रयोगः सम्भवति। कर्तृविशेषणत्वात् कर्तुः लिङ्गवचनानुसारेण अस्य अच्प्रत्ययान्तस्यापि समानलिङ्गवचनत्वं प्राप्नोति। यथा पचः रामः, पचाः रामाः, पचा बालिका, पचाः बालिकाः, पचं मित्रं, पचानि मित्राणि इत्यादयः।

**१.१४. ष्वुन्**– "शिल्पिनि ष्वुन्"[30] इति सूत्रेण कर्त्रर्थकः कृत्प्रत्ययोऽयं विधीयते। शिल्पं भवति क्रियाकौशलम्। तस्मिन् शिल्पवति कर्तरि धातोः ष्वुन् स्यात्। ष्वुन् प्रत्ययस्य षकारस्य नकारस्य च इत्संज्ञायां तयोः लोपे वु इत्येव अवशिष्यते। ततः"युवोरनाकौ" इति सूत्रेण वोः अक् इत्यादेशः प्राप्नोति। तत्र नकारः आद्युदात्तार्थं षकारश्च ङीषर्थं प्रयुज्यते। यथा नृत्धातोः प्रकृतसूत्रेण ष्वुनि अनुबन्धलोपे अकादेशे गुणे रपरत्वे नर्तकः इति रूपम्। कृत्संज्ञकोऽयं ष्वुन्प्रत्ययः "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे विधीयते। अतः अनेन ष्वुन्प्रत्ययान्तेन कर्त्रर्थः प्रतीयते। एवं नर्तकः इत्यस्य नृत्यकर्ता इत्यर्थः सम्पद्यते। अनेन ष्वुन्प्रत्ययान्तेन क्रिया न प्रतिपाद्यते। अतः वाक्यसमाप्त्यर्थम् अस्त्यासीदित्यादीनां प्रयोगोऽपेक्षते। तत्र समाप्तिसूचकेन क्रियापदेन य कालः उच्यते, स एव ष्वुन्प्रत्ययान्तस्य कालः इति बोध्यम्। ष्वुन्प्रत्ययान्तस्यास्य सर्वासु प्रथमादिविभक्तिषु नर्तकः आगच्छति, नर्तकं पश्य, नर्तकेन दर्शितम्, नर्तकाय देहि, नर्तकात् पतितं भूषणम्, नर्तकस्य नाम किम्, नर्तके नृत्यकला अस्तीत्यादिरूपेण प्रयोगः दृश्यते। नर्तके आगते सभा आरभ्यते इत्यादिरूपेण भावसप्तम्यामपि अस्य प्रयोगः दृश्यते। कर्तृविशेषणत्वात् कर्तुः लिङ्गवचनानुसारेण अस्य ष्वुन्प्रत्ययान्तस्यापि समानलिङ्गवचनत्वं प्राप्नोति। यथा नर्तकः रामः, नर्तकाः रामाः, नर्तकी भगिनी, नर्तक्यः अप्सरसः इत्यादयः। एवमन्येष्वपि ऊह्यम्।

**उपसंहारः**

आचार्येण पाणिनिना विरचितायाम् अष्टाध्याय्यां तृतीयाध्याये "कृदतिङ्" इत्यनेन कृत्संज्ञां निरूप्य कृत्प्रत्ययाः प्रतिपादिताः। तेषु केवलं कर्त्रर्थकानां कृत्प्रत्ययानामेव वैशिष्ट्यमत्र आलोचितम्। अष्टाध्याय्या तृतीयाध्याये ये कर्त्रर्थकाः कृत्प्रत्ययाः प्राप्यन्ते ते तावत्– क्तवतु, क्त, शतृ, शानच्, कानच्, क्वसु, शानन्, चानश्, ण्वुल्, तृच्, ल्यु, णिनि, अच्, ष्वुन्, ष्यन् चेति। भाषायाम् एतेषां व्यवहारवैचित्र्यं सोदाहरणं ससूत्रं च प्रतिपादितम्। वैयाकरणदृष्ट्या एतेषां प्रत्ययानाम् अर्थाः, वाक्यार्थाः, क्रियान्वयः, लिङ्गवचनाद्यन्वयः चापि प्रदर्शिताः। एवम्प्रकारेण एतेषां कर्त्रर्थककृत्प्रत्ययानां भाषावैज्ञानिकमध्ययनं प्रबन्धेऽस्मिन् सरलतया प्रस्तुतमिति शम्।

***

[1] अष्टाध्यायी – [१/४/१४]
[2] अष्टाध्यायी – [३/१/९३]
[3] अष्टाध्यायी – [१/१/२६]
[4] अष्टाध्यायी – [३/२/१०२]
[5] अष्टाध्यायी – [१/३/८]

[6] अष्टाध्यायी – [१/३/२]
[7] अष्टाध्यायी – [१/३/९]
[8] अष्टाध्यायी – [३/४/६७]
[9] अष्टाध्यायी – [१/१/२६]
[10] अष्टाध्यायी – [३/४/७१]
[11] अष्टाध्यायी – [३/४/७२]
[12] अष्टाध्यायी – [६/४/३७]
[13] अष्टाध्यायी – [३/२/१२४]
[14] अष्टाध्यायी – [३/४/६७]
[15] अष्टाध्यायी – [३/२/१२४]
[16] अष्टाध्यायी – [३/२/१०६]
[17] अष्टाध्यायी – [३/२/१०७]
[18] अष्टाध्यायी – [३/२/१०८]
[19] अष्टाध्यायी – [३/२/१२८]
[20] अष्टाध्यायी – [३/२/१२३]
[21] अष्टाध्यायी – [३/२/१२९]
[22] अष्टाध्यायी – [३/१/१३३]
[23] अष्टाध्यायी – [७/१/१]
[24] अष्टाध्यायी – [३/१/१३३]
[25] अष्टाध्यायी – [५/३/५९]
[26] अष्टाध्यायी – [३/१/३]
[27] अष्टाध्यायी – [३/१/१३४]
[28] अष्टाध्यायी – [३/१/१३४]
[29] अष्टाध्यायी – [३/१/१३४]
[30] अष्टाध्यायी – [३/१/१४५]

## <u>ग्रन्थसूची</u>


१) पतञ्जलिः। *व्याकरणमहाभाष्यम्* । श्रीगुरुप्रसादशास्त्री (सम्पा.)। नवदेहली : राष्ट्रियसंस्कृतसंस्थानम्, २००६।

२) भट्टः, नागेशः। *परिभाषेन्दुशेखरः*। मिश्रः, विश्वनाथः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०११।

३) भट्टः, नागेशः। *लघुशब्देन्दुशेखरः*। प्रो. बालशास्त्री (सम्पा.)। वाराणसी : चौखम्बासुरभारतीप्रकाशन, २००७।

४) भट्टः, नागेशः। *लघुशब्देन्दुशेखरः* (भैरवीटिप्पणीसहितः)। शर्मा, शिवप्रसादः; शर्मा, श्रीनिवासः च (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २००६।

५) भट्टः, कौण्डः। *वैयाकरणभूषणसारः* (सावित्रीव्याख्योपेतः)। मिश्रः, आद्याप्रसादः (सम्पा.)। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९८८।

६) भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी*। श्रीबालकृष्णशर्मपञ्चोली (सम्पा.)।वाराणसी : मोतीलालबनारसीदास, १९६६।

७) भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी*। श्रीगोपालदत्तपाण्डेयः (सम्पा.)। वाराणसी : चौखम्बासुरभारतीप्रकाशन, २०१०।

८) वामनजयादित्यौ। *काशिका* (न्यासपदमञ्जरीसहिता)। त्रिपाठी, जयशङ्करलालः; मालवीयः, सुधाकरः च (सम्पा.)। वाराणसी : तारा बुक एजेन्सी, १९८४।


***